# भाग – IV
## भाषा – I
## संस्कृत

अभ्यर्थिनः **चतुर्थ भागस्य** (Part-IV) प्रश्नानाम् (**प्र.सं.** 91-120) उत्तरं दद्युः, यदि तैः **संस्कृतं प्रथमभाषा**–रूपेण (Language-I) चितम् ।

**संकेत : अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (91 - 99) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत :**

वाग्भटः विख्यातः प्राचीनः वैद्यराजः । सः सिन्धप्रान्ते जन्म अलभत । सः आसीत् पञ्चमे शतके । तेन आयुर्वेदशास्त्रे विपुलं संशोधनं कृतम् । तेन लिखितस्य ग्रन्थस्य नाम – 'अष्टाङ्गसंहिता' इति । अद्यापि सः ग्रन्थः प्रमाणभूतः मन्यते । तिबेटतः रामेश्वरपर्यन्तं तस्य कीर्तिः प्रसृता । एतं ग्रन्थम् अधिकृत्य अद्य यावत् २९ भाष्यविवरणग्रन्थाः प्रसिद्धाः सन्ति ।

एकदा धन्वन्तरिः व्यचिन्तयत् – 'पृथिवीतले विद्यमानानां विविधानां वैद्यानां परीक्षा करणीया' इति । अतः तेन शुकस्य रूपं धृतम् । सः एकम् एव प्रश्नं त्रिवारम् उच्चार्य वैद्यान् पृष्टवान् । सः प्रश्नः आसीत् – 'कोऽरुक् ? कोऽरुक् ? कोऽरुक् ?' (कः आरोग्यसम्पन्नः भवति इत्यर्थः)

वैद्याः विविधानि उत्तराणि दत्तवन्तः केचन तु सुदीर्घम् उत्तरं दत्तवन्तः । किन्तु कस्यापि उत्तरेण धन्वन्तरिः न सन्तुष्टः ।

अन्ते शुकः वाग्भटं प्रति आगतः । वाग्भटः स्नानार्थं नदीतीरं गच्छति स्म । शुकरूपधारी धन्वन्तरिः मार्गे स्थितस्य एकस्य वृक्षस्य शाखायाम् उपविष्टः । तेन वाग्भटाय त्रिवारं प्रश्नः कृतः – 'कोऽरुक् ? कोऽरुक् ? कोऽरुक् ?'

वाग्भटेन ज्ञातं यत् एषः न सामान्यः पक्षी इति । सः पक्षिणं नमस्कृतवान् । पक्षिणे सत्काररूपेण फलानि तेन अर्पितानि ।

शुकः अवदत् – "आदौ उत्तरं दातव्यम् । यदि उत्तरं तृप्तिकरं स्यात् तर्हि एव अहम् उपाहारं स्वीकरिष्यामि" इति ।

वाग्भटः क्षणमात्रं चिन्तितवान् । त्रयाणां प्रश्नानाम् एकम् एव उत्तरं सः दत्तवान् – "हितभुक्, मितभुक् उष्णभुक्" इति । तस्य आशयः – आहारः हितकारः मितरूपः उष्णः च भवेत् इति ।

वाग्भटस्य उत्तरेण शुकः सन्तुष्टः अभवत् । सः उपाहारं स्वीकृत्य ततः निरगच्छत् ।

**91. अष्टाङ्गसंहिताग्रन्थाधारेण कति भाष्यविवरण–ग्रन्थाः प्रसिद्धाः ?**

(1) नवतिः
(2) नवविंशतिः
(3) एकोनविंशतिः
(4) नव

**92. वैद्यानां परीक्षां कर्तुं धन्वन्तरिणा कस्य रूपं धृतम् ।**

(1) मनुष्यस्य
(2) शुकस्य
(3) शुनः
(4) कीटस्य

**93. कोऽरुक् इति अत्र सन्धिच्छेदः कथम् ?**

(1) कः अरुक्
(2) को रुक्
(3) को अरुक्
(4) कः रुक्

**94. हितभुक् मितभुक् उष्णभुक् इति वाक्ये मितशब्दस्य अर्थः _____**

(1) मित्रम्
(2) सूर्यः
(3) अल्पम्
(4) विशिष्टम्

**95. वैद्यपरीक्षायां कः उत्तीर्णः अभवत् ?**

(1) धन्वन्तरिः

(2) वाग्भटः

(3) शुकः

(4) चरकः

**96. तिब्बतदेशात् रामेश्वरपर्यन्तं कस्य प्रसिद्धिः आसीत् ?**

(1) धन्वन्तरेः

(2) क्षपणकस्य

(3) शुश्रुतस्य

(4) वाग्भटस्य

**97. उष्णभुक् इति समस्तपदस्य विग्रहः कथं स्यात् ?**

(1) उष्णं भुङ्क्ते इति

(2) उष्णं भोजयति इति

(3) उष्णं भुक्तम् इति

(4) उष्णेन भुक्

**98. कस्मिन् क्षेत्रे वाग्भटः प्रसिद्धः आसीत् ?**

(1) व्याकरणक्षेत्रे

(2) कृषिक्षेत्रे

(3) वाणिज्यक्षेत्रे

(4) वैद्यकीयक्षेत्रे

**99. अष्टाङ्गसंहिता इति कस्य शास्त्रस्य ग्रन्थः ?**

(1) दर्शनशास्त्रस्य

(2) गणितशास्त्रस्य

(3) वैद्यकीयशास्त्रस्य

(4) व्याकरणशास्त्रस्य

**अधोलिखितान् श्लोकान् पठित्वा प्रश्नानां (100 – 105) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत –**

अश्रद्धा परमं पापं,
श्रद्धा पापप्रमोचिनी
जहाति पापं श्रद्धावान्,
सर्पो जीर्णामिव त्वचाम् ।। (1)

दूरेऽपि सज्जनाः भान्ति
हिमवन्नगसन्निभाः ।
असन्तो नैव दृश्यन्ते
रात्रिक्षिप्ताः शरा यथा ।। (2)

भक्तिर्देवे मतिर्धर्मे,
शक्तिस्त्यागे रतिः श्रुतौ ।
दया सर्वेषु भूतेषु
स्यान्मे जन्मनि जन्मनि ।। (3)

आयुषः क्षण एकोऽपि
सर्वरत्नैर्न न लभ्यते ।
नीयते स वृथा येन
प्रमादः सुमहानहो ।। (4)

स्वभावो नोपदेशेन
शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं
पुनर्गच्छति शीतताम् ।। (5)

दुर्जनः सुजनीकर्तुं
यत्नेनापि न शक्यते ।
संस्कारेणापि लशुनं
कः सुगन्धीकरिष्यति ।। (6)

**100. सज्जनानां तुलना केन सह कृता अस्ति ?**

(1) सर्पः

(2) हिमालयः

(3) सर्वरत्नानि

(4) पानीयम्

**101. दया सर्वेषु भूतेषु इति कामना कदा पर्यन्तं क्रियते ?**

(1) अस्मिन् जन्मनि

(2) पूर्वजन्मनि

(3) अपरजन्मनि

(4) सर्वस्मिन् जन्मनि

**102. उपदेशेन स्वभावः _____**

(1) अन्यथा कर्तुं न शक्यते

(2) अन्यथा कर्तुं शक्यते

(3) यथार्थं कर्तुं शक्यते

(4) यथेष्टं कर्तुं न शक्यते

**103. सर्वरत्नैः किं न लभ्यते ?**

(1) स्वभावः

(2) प्रासादः

(3) आयुषः एकोऽपि क्षणः

(4) उपदेशः

**104. संस्कारेणापि लशुनं कः सुगन्धीकरिष्यति इति वाक्यस्य आशयः _____**

(1) दुर्जनः सुगन्धीकरिष्यति

(2) सुजनः सुगन्धीकरिष्यति

(3) कोऽपि न सुगन्धीकरिष्यति

(4) सर्वः सुगन्धीकरिष्यति

**105. "जहाति पापं श्रद्धावान् सर्पो जीर्णामिव त्वचाम्" इति उक्तौ कः अलङ्कारः प्रयुक्तः ?**

(1) अनुप्रासः

(2) उपमा

(3) उत्प्रेक्षा

(4) भ्रान्तिमान्

**अधोलिखितप्रश्नानां प्रदत्तविकल्पेभ्यः उचिततमम् उत्तरं चिनुत ।**

**106. व्याकरणं पाठयितुं निम्नलिखितेषु कः प्रभावकारी मार्गः ?**

(1) आदौ व्याकरणनियमानां पाठनं पश्चात् उदाहरणानाम् ।

(2) पाठस्य अनुवादसमये व्याकरणनियमानां पाठनम् ।

(3) एकस्य विशिष्टव्याकरणपुस्तकस्य आधारेण व्याकरणपाठनम् ।

(4) सन्दर्भानुसारं व्याकरणपाठनम् येन नियमानाम् आविष्कारः भवेत् ।

**107. सामाजिक–विनिमयः (social interaction) इति सिद्धान्तः केन सम्बद्धः ?**

(1) पाणिनिः (Panini)

(2) स्किन्नर (Skinner)

(3) वायगोत्स्की (Vygotsky)

(4) कोलबर्ग (Kohlberg)

**108. अधोलिखितेषु किं बालानां भाषायाः अधिग्रहणे अधिकं सहायकं भवेत् ?**

(1) गृहस्य वातावरणं यत्र अधिकं भाषितुं बालाय अनुमतिः न दीयेत ।

(2) गृहे परिसरे च ज्येष्ठानां वार्तालापस्य श्रवणम् ।

(3) शुद्धानाम् उच्चारितशब्दानां वाक्यानां वा पुनः पुनः अभ्यासं कर्तुं बालेभ्यः निर्देशः ।

(4) अन्यैः बालैः सह क्रीडा ।

**109. बाला: सहजतया भाषाया: अधिग्रहणं कुर्वन्ति यदि बाला: _____**

(1) एकस्मिन् काले एकया एव भाषया परिचिता: भवन्ति ।

(2) अनेकाभि: भाषाभि: परिचिता: भवन्ति यासाम् उपस्थिति: तेषाम् अव्यवहिते वातावरणे अस्ति ।

(3) ऐकान्त्येन इलेक्ट्रोनिकमाध्यमेन मुद्रितप्रसारमाध्यमेन च परिवेष्टिता: भवन्ति ।

(4) तस्या: भाषाया: व्याकरणिकसंरचनाभि: सह परिचिता: भवन्ति ।

**110. एकस्य पाठस्य पठनविषये अधोलिखितेषु किं सर्वाधिकं महत्त्वपूर्णम् ?**

(1) पाठस्य प्रत्येकं शब्दस्य पठनम्

(2) विरामचिह्नानाम् उपरि ध्यानम्

(3) लिखितपाठस्य अर्थप्राप्ति:

(4) शुद्धोच्चारणसहितं पाठस्य उच्चै: पठनम्

**111. अधस्तनेषु किं भाषाया: अध्यापनस्य उद्देश्यं नास्ति ?**

(1) अर्थावबोधसहितं पठने क्षमता

(2) आयासपूर्वं विचाराणाम् अभिव्यक्ति:

(3) श्रुतस्य अवबोधने दक्षता

(4) सुसंगतलेखनस्य विकास:

**112. ध्वन्यात्मकसचेतनताया: आधिक्येन सम्बन्ध: अस्ति _____**

(1) श्रवणक्षमतया सह

(2) सम्भाषणक्षमतया सह

(3) पठनक्षमतया सह

(4) लेखनक्षमतया सह

**113. नोम चॉमस्की (Noam Chomsky) मतानुसारं भाषाया: कृते बालानाम् सहजात–दक्षता अस्ति _____**

(1) अधिग्रहणस्य (acquisition)

(2) अनुकरणस्य (imitation)

(3) रूपान्तरणस्य (transformation)

(4) अनुवादस्य (translation)

**114. भाषाकौशलानाम् अध्यापनं भवेत् _____**

(1) अनुकरणमाध्यमेन

(2) पृथक्तया

(3) विस्तृतविवरणेन

(4) सामग्रिकरूपेण

**115. प्रारम्भिकबालान् शिक्षिका चित्राङ्कनं रङ्गकार्यं च कर्तुं प्रोत्साहयति । एवं सा _____**

(1) कक्षायां नीरवतां स्थापयितुं विद्यार्थिन: कार्यव्यस्तान् करोति ।

(2) सूक्ष्ममोटरकौशलस्य विकासं करोति ।

(3) उदीयमानानां बालकलाकाराणां कृते अवसरं ददाति ।

(4) सामान्यतया छात्रान् कार्यव्यस्तान् करोति ।

**116. मौखिक–भाषाकौशलस्य विकासार्थं निम्नलिखितेषु क: प्रयोग: सर्वाधिक: उपयोगी भविष्यति ?**

(1) कवितानां पठनं एकलं सामूहिकं च ।

(2) नाट्याभिनये सहभाग: ।

(3) शिक्षकस्य पठनानन्तरं पाठ्यपुस्तकस्य एकस्य पाठस्य सामूहिकरूपेण पठनम् ।

(4) शिक्षकम् अनु सामूहिकरूपेण शब्दानां शुद्धोच्चारणस्य अभ्यास: ।

**117. यथा पाठे निर्दिष्टं तथा कथाया: घटनानां क्रमं योजयितुं तृतीयकक्षाया: शिक्षिका छात्रान् निर्दिशति । एष: कार्यकलाप: साहाय्यं करिष्यति _____**

(1) पठनावबोधे (reading comprehension)

(2) बोधनीयप्रविष्टौ (comprehensible input)

(3) बालानां लेखनकौशलविकासे

(4) बालानां वार्तालापसमयस्य सीमावर्धनम् (maximizing students talking time)

**118. द्वितीयकक्षाया: शिक्षिका कक्षास्थितवस्तूनि नामाङ्कितानि कृतवती । एतेन छात्राणां प्रकृतवस्तुभि: सह लिखितशब्दानां सम्बन्धस्थापने सहायता भविष्यति । एवंविधं कार्यं छात्राणां संवर्धनं करिष्यति _____**

(1) व्याकरणज्ञानस्य

(2) लेखनकौशलस्य

(3) शब्दज्ञानस्य

(4) हस्ताक्षरस्य

**119. अधोलिखितेषु किं बालानां भाषादक्षताया: आकलने न्यूनं प्रभावकारि भवेत् ?**

(1) कथाकथनम्

(2) कथालेखनम्

(3) वृत्तवर्णनम्

(4) श्रुतलेखनम्

**120. अधस्तनेषु निर्देशेषु छात्राणां भाषाक्षमताविकासार्थं किं सर्वाधिकम् उपयोगि भवेत् ?**

(1) भवत: प्रियपुस्तकेषु एकतमस्य नाम वदतु ।

(2) 'रोचते' इति पदं प्रयुज्य एकं वाक्यं निर्मातु ।

(3) भवत: भवत: मातुश्च मध्ये एकं संवादं लिखतु ।

(4) स्वपठितकविताया: कवे: नाम लिखतु ।

## भाग – V
## भाषा – II
## संस्कृत

अभ्यर्थिनः **पञ्चमभागस्य** (Part-V) प्रश्नानाम् (**प्र.सं.** 121-150) उत्तरं दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा** (Language-II) रूपेण चितम् ।

**निर्देश : अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां (121 – 128) विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत –**

ग्रामे आसीत् कश्चन दुर्बलकायः । शरीर–शक्तिहीनताकारणतः सः भृतिकार्यं न प्राप्नोति स्म । सः देवं प्रार्थितवान् – "भगवन् ! मम उदरपूरणाय काश्चित् व्यवस्थां परिकल्पयतु कृपया" इति । तस्यां रात्रौ तस्य स्वप्ने प्रत्यक्षीभूय भगवान् अवदत् – "शिलानोदनं कुरु" इति ।

तस्य गृहस्य समीपे काचित् महाशिला आसीत् । सः निर्धनः तस्याः नोदनम् आरब्धवान् । शिला तु महाकारा आसीत् । अतः सः तां कम्पयितुम् अपि न शक्तवान् । तथापि भगवतः आदेशं पालयितुम् इच्छन् सः स्वस्य प्रयत्नं न परित्यक्तवान् ।

एवमेव कानिचन दिनानि गतानि । जनाः तस्य प्रयत्नं दृष्ट्वा उपहासवचनानि उक्तवन्तः । 'तां महाशिलां कम्पयितुम् अपि न शक्नोति भवान् । एतस्याः नोदने प्रवृत्तः भवान् मूर्खः एव' इति

एतत् श्रुत्वा अपि निर्धनः स्वस्य प्रयत्नं तु न परित्यक्तवान् । एवमेव मासत्रयम् अतीतम् । तदीयः शिलानोदनप्रयत्नः तु व्यर्थः एव आसीत् । अतः सः नितरां खिन्नः । स्वस्य दौर्भाग्यं स्मरन् एकदा सः निद्राम् अकरोत् । तस्य स्वप्ने देवः पुनः प्रत्यक्षः अभवत् । तं दृष्ट्वा सः निर्धनः – ''देव ! व्यर्थकार्ये भवता अहं योजितः । तत् कृतवता मया उपहासपात्रता प्राप्ता'' इति अवदत् ।

तदा देवः उक्तवान् – ''भोः ! भवतः परिश्रमः व्यर्थः न । अतः अलं चिन्तया ।''

तदा क्रुद्धः निर्धनः अवदत् – "मया द्वित्रान् मासान् यावत् शिलानोदनं कृतम् । किन्तु शिला न अकम्पत अपि । तां नोत्तुं मया कृतः प्रयासः किं व्यर्थः न ?" इति ।

"सा महाशिला भवता कम्पयितुं न शक्या इति अहं जानामि एव । नोदनात् शिला लवमात्रेणापि न अकम्पत इति तु सत्यम् । किन्तु मासत्रयं यावत् भवता यः नोदनप्रयासः कृतः ततः भवतः हस्तौ, पादौ, स्नायवश्च शक्तियुक्ताः जाताः । भवता दृढकायता प्राप्ता । अतः यत्किमपि कार्यं कर्तुं समर्थः भवान् । मया एतदेव इष्टं, न तु शिलायाः अपसारणम्" इति अवदत् भगवान् ।

**121. सः नितरां खिन्नः इति वाक्ये नितराम् इति अव्ययस्य कः अर्थः ?**

(1) सर्वदा

(2) कदाचित्

(3) अत्यन्तम्

(4) सहसा

**122. अलं चिन्तया इति वाक्यस्य अभिप्रायः _____**

(1) चिन्तां न कुरु

(2) चिन्तां कुरु

(3) व्यर्थचिन्तां कुरु

(4) चिन्ता अलङ्कारसदृशी अस्ति

**123. दुर्बलकायः मनुष्य कथम् आसीत् ?**

(1) धनिकः

(2) निर्धनः

(3) बुद्धिमान्

(4) गुणी

**124. भगवत: आदेशेन दुर्बलकाय: मनुष्य: कतिदिनानि शिलानोदनम् अकरोत् ?**

(1) मासं यावत्

(2) मासद्वयं यावत्

(3) मासत्रयं यावत्

(4) सप्ताहं यावत्

**125. दुर्बलजनेन शिलानोदनकार्यं कारयता भगवता किम् अभीष्टम् आसीत् ?**

(1) दुर्बलजनस्य धनागम: भवेत् इति

(2) शिलाया: अपसारणं भवेत् इति

(3) शिलाकम्पनं भवेत् इति

(4) दुर्बल: शक्तियुक्त: स्यात् इति

**126. शक्तिहीनताकारणत: स: दुर्बल: किं न प्राप्नोति स्म ?**

(1) धनम्

(2) भृतिकार्यम्

(3) आशीर्वादम्

(4) जनापवादम्

**127. निर्धन: इति पदस्य विग्रह: कथम् स्यात् ?**

(1) नास्ति धनम्

(2) नि:शेषेण धनम् यस्य स:

(3) निर्गतं धनं यस्य स:

(4) निरस्तं धनम्

**128. शिलानोदनं कुरु इति कस्य कृते निर्देश: आसीत् ?**

(1) भगवत: कृते

(2) दुर्बलकायपुरुषस्य कृते

(3) ग्रामवासिनां कृते

(4) शिलाया: कृते

**अधोलिखितं गद्यांशं पठित्वा तदाधारित – प्रश्नानां (129 - 135) विकल्पात्मकोत्तरेभ्य: उचिततमम् उत्तरं चित्वा लिखत –**

स: कश्चन लघुकुटुम्ब: । तस्मिन् पितरौ, पुत्र:, पुत्री च आसन् । एकस्मिन् दिने मध्याह्ने पुत्र: भोजनार्थं गृहम् आगत: । माता जलचषकं स्थालिकां च संस्थाप्य अन्नं सारं च पर्यवेषयत् । पुत्र: कवलमात्रं खादित्वा जननीम् अगर्हयत् – "अम्ब ! किमिदम् ? सार: सम्पूर्ण: लवणमय: । एतत् खादितुं कथं शक्येत ? मह्यं भोजनं मास्तु......"

मातरं भर्त्स्यमान: एव स: कोपेन गृहात् बहि: गतवान् ।

सायं दीपज्वालनसमय: अभवत् । तथापि स: युवा पुत्र: गृहं न आगत: । रात्रौ अष्टवादनसमये आगत: स: हस्तपादं प्रक्षाल्य दूरदर्शनस्य पुरत: आसन्दे उपाविशत्, हस्तेन नियन्त्रकं (रिमोट्) गृहीत्वा ।

निमेषाभ्यन्तरे पिता पुत्रस्य समीपम् आगत: । तं दृष्ट्वा पुत्र: चिन्तितवान् – 'किमिदं पिता मम समीपे एव आगच्छति ! एतावत्पर्यन्तम् एकवारमपि जल्पनादिकं तेन न कृतं मया सह । इदानीं मां गर्हयितुम् एव आगच्छन् स्यात् प्राय: स: । ...'

परन्तु अवनतवदनस्य पुत्रस्य पार्श्वे उपविशन् पिता प्रावोचत् – "वत्स, भवान् मध्याह्ने भोजनं कृतवान् ननु ?"

"......"

"वत्स ! भवन्तम् एव अहं पृच्छामि । भवान् मध्याह्ने भोजनं कृतवान् किम ?"

"आम् !" – किञ्चित् रूक्षतया अवदत् पुत्र: ।

"कुत्र ?" मृदुस्वरेण एव अपृच्छत् पिता ।

"मम सुहृद: माम् उपाहारमन्दिरं नीत्वा भोजनं कारितवन्त:" – किञ्चिदपि अविचलित: सन् पुत्र: उक्तवान् ।

"सुष्ठु, पुत्र ! सुष्ठु । भवान् भोजनं कर्तुम् इच्छति चेत् भवता समग्रे अपि विश्वे गृहाणि प्राप्येरन् । तत्र ते तुभ्यं स्वादु भोजनमपि दद्यु: । परन्तु भवत: मात्रे अस्माकं गृहमेव प्रपञ्च: । तस्या: लोके अहं, भवान्, भवत: अनुजा च एव वसाम: । अस्माकं त्रयाणां हितमेव तस्या: लक्ष्यम् । भवता भोजनं न कृतम् इत्यत: सा एतावत्पर्यन्तं बिन्दुमात्रं जलम् अपि न स्वीकृतवती । इतोऽपि तस्या: मन: परितपत् अस्ति – 'अद्य मया किं कृतम् ! पाकसमये मम अवधानं कुत्र अगच्छत् ? मम अजागरूकताकारणत: सार: लवणमय: जात: । तदर्थं पुत्र: किञ्चिदपि न भुक्तवान् । स: कुत्र

गतवान् स्यात् ? क्षुत्पिपासानिवारणार्थं स: कीदृशं कष्टम् अनुभूतवान् स्यात् इति न ज्ञायते' इति" इति उक्तवान् पिता ।

पितु: हृदयस्पर्शिनीं वाणीं श्रुत्वा पुत्र: आत्मावलोकनम् अकरोत् । तत: सावधानतया उत्थाय शनै: शनै: जनयित्र्या: समीपम् अगच्छत् । सा म्लानवदना खिन्ना च भूत्वा उपविष्टवती आसीत् तत्र ।

पुत्र: विनयेन ताम् उपसर्प्य मृदुमधुरेण मन्द्रस्वरेण अकथयत् – "अम्ब ! महती बुभुक्षा मम । किं न परिवेषयसि अविलम्बेन ?" इति ।

**129. यदा पिता पुत्रस्य पार्श्वे उपाविशत् तदा पुत्र: कीदृश: आसीत् ?**

(1) अधोमुख:
(2) ऊर्ध्वमुख:
(3) हर्षित:
(4) दु:खित:

**130. पुत्र: भोजनं न कृतवान् इत्यत: माता कीदृशी आसीत् ?**

(1) सन्तुष्टा सती स्वकार्ये निमग्ना आसीत् ।
(2) जलमपि न पीत्वा आसीत् ।
(3) दूरदर्शनं पश्यन्ती आसीत् ।
(4) पुत्रीं पतिं च तर्जयन्ती आसीत् ।

**131. पुत्रं बोधयितुं पितु: वाणी कीदृशी आसीत् ?**

(1) उत्साहवर्धका
(2) सान्त्वनाप्रदा
(3) कोपकारका
(4) हृदयस्पर्शिका

**132. अद्य मया किं कृतम् इति कस्य मनसि विचार: प्राचलत् ?**

(1) मातु:
(2) पुत्रस्य
(3) पितु:
(4) अनुजाया:

**133. भोक्तुम् इच्छा इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?**

(1) भोजनेच्छा
(2) पिपासा
(3) क्षुत्
(4) बुभुक्षा

**134. जल्पनादिकं तेन न कृतं मया सह इति वाक्यं कस्मिन् वाच्ये लिखितम् ?**

(1) कर्तृवाच्ये
(2) भाववाच्ये
(3) कर्मवाच्ये
(4) कर्मकर्तृवाच्ये

**135. गृहे भोजनं न खादित्वा क: बहि: अगच्छत् ?**

(1) पिता
(2) पुत्र:
(3) पुत्री
(4) माता

**उचिततमं विकल्पं चित्वा अधोलिखितप्रश्नानाम् उत्तरं प्रदत्त ।**

**136. बालस्य भाषाधिग्रहणे अधस्तनेषु कस्य भूमिका सर्वतो महत्त्वपूर्णा ?**

(1) शिक्षकस्य
(2) परिवारस्य
(3) विद्यालयस्य
(4) प्रसारमाध्यमस्य

**137. व्याकरणनियमानां कण्ठस्थीकरणम् _____ पद्धते: केन्द्रम् अस्ति ।**

(1) संरचनात्मकोपागम:
(2) प्रत्यक्षपद्धति:
(3) व्याकरणानुवादपद्धति:
(4) साहजिकोपागम:

138. **भाषाया: अधिगमस्य कृते किं न महत्त्वपूर्णम् ?**

(1) प्रोत्साहनम्

(2) आत्मविश्वास:

(3) अधिगमं प्रति प्रवृत्ति:

(4) अनुवाद:

139. **लेखनार्थम् बालान् अध्यापनसमये शिक्षकरूपेण भवता किं करिष्यते ?**

(1) भाषाया: वर्णमालां लेखितुं बालेभ्य: निर्देशं दास्यति ।

(2) स्वविचारान् लेखितुं बालेभ्य: अवसरं दास्यति ।

(3) आदौ कण्ठस्थीकरणं कृत्वा अनन्तरम् एकं परिच्छेदं सुन्दरहस्ताक्षरै: लेखितुं निर्देशं दास्यति ।

(4) कृष्णफलकत: अक्षराणि उद्धर्तुं बालेभ्य: अवसरं दास्यति ।

140. **छात्राणां कृते एकाम् अध्ययनाध्यापनसामग्रीं (teaching learning material) चिनोतुम् अधोगतेषु किं सर्वतो महत्त्वपूर्णम् ?**

(1) समीपस्थविपण्यां तस्या: सामग्र्या: उपलब्धि: भवेत् ।

(2) सा सामग्री महार्घा न स्यात् ।

(3) सा सामग्री छात्रै: एव निर्मिता स्यात् ।

(4) सा सामग्री सन्दर्भानुकूलं भवेत् तस्या: च संघटितरूपेण उपयोग: क्रियेत ।

141. **द्वितीयकक्षाया: केचन छात्रा: केषाञ्चन वर्णानाम् उच्चारणं कर्तुं काठिन्यम् अनुभवन्ति । तेषां काठिन्यनिवारणार्थं अधोगतमार्गेषु क: मार्ग: सर्वतो प्रभावकारी भवेत् ?**

(1) शिक्षिका मनुष्यमुखस्य एकां प्रतिकृतिम् उपयुज्य तत्र विशिष्टवर्णस्य विशिष्टोच्चारणस्थानस्य प्रदर्शनं कुर्यात् ।

(2) अन्यानुप्रासिशब्दानाम् इव लघुयुग्मकार्यकलापानाम् (minimal pair activity) उपयोगं कुर्यात् । एवं सा छात्रान् वर्णोच्चारणं कारयेत् शब्देषु तस्य वर्णस्य अभिज्ञानं च कारयेत् ।

(3) पाठस्य उच्चै: वाचनं कृत्वा विशिष्टवर्णं रेखाङ्कितं कृत्वा तद्विषये विवरणं दद्यात् ।

(4) छात्रै: पौन:पुन्येन अभ्यासं कारयेत् येन तेषां काठिन्यस्य निवारणं भविष्यति ।

142. **का सा पद्धति: यस्यां व्याकरणनियमानामुपरि प्राधान्येन ध्यानं दीयते अनन्तरं च तदाधारितानाम् उदाहरणानाम् उपरि ?**

(1) आगमन–विधि: (inductive method)

(2) निगमन–विधि: (deductive method)

(3) व्याकरणानुवाद–विधि: (grammar and translatoin method)

(4) प्रत्यक्षविधि: (direct method)

143. **विद्यार्थिन: भाषाया: अधिग्रहणं कुर्वन्ति ____**

(1) साहजिकविनिमयात्मकवातावरणे भाषाया: व्यवहारं कृत्वा ।

(2) भाषाया: संरचनाया: विश्लेषणं कृत्वा ।

(3) तस्या: भाषायाः साहित्यस्य अध्ययनं कृत्वा ।

(4) तस्या: भाषाया: प्रयोक्तॄणां संस्कृतिविषये ज्ञात्वा ।

**144. सूक्ष्ममोटरकौशलस्य (fine motor skill) विकासस्य किम् उत्कृष्टम् उदाहारणम् अस्ति ?**

(1) आरोहणम् (climbing)

(2) कूर्दनम् (hopping)

(3) लेखनम् (writing)

(4) पठनम्

**145. शिक्षकेण पृष्टेषु अधोलिखितप्रश्नेषु कः प्रश्नः कक्षायाः बहुभाषिकवादस्य प्रोत्साहनं कुर्यात् ?**

(1) वायुफुल्लितं (balloons) कियदूर्ध्वं डयितुं शक्नुवन्ति ।

(2) स्वभाषया शाकानां नामानि लिखत ।

(3) किं भवतः पालितपशुः अस्ति ?

(4) किं भवान् अक्षराणि लिखितवान् ?

**146. निम्नतरकक्षासु अन्त्यानुप्रासिकवितानामुपयोगः क्रियेत । यतः _____**

(1) ताभिः विद्यार्थिनः लक्ष्यभाषां भाषितुम् अवसरं प्राप्नुवन्ति ।

(2) ताभिः विद्यार्थिनः अनुशासिताः तिष्ठन्ति ।

(3) ताभिः लक्ष्यभाषायाः व्याकरणस्य अधिगमे सहायता भवति ।

(4) ताभिः विद्यार्थिनः कठिनशब्दानां वर्णनं कर्तुं ततश्च वाक्यानि रचयितुं समर्थाः भवन्ति ।

**147. एका शिक्षिका कक्षायां श्रवणसम्बन्धिगतिविधिं कारयितुं निश्चयं कृतवती । सा चर्चारूपाणां गतिविधीनाम् योजनां करोति । कांश्चन गूढप्रश्नान् पृष्ट्वा छात्रान् श्रोतुं नियोजयति । तेषां रुचिं चर्चां च वर्धयति । एताः प्रस्तुतयः सन्ति _____**

(1) श्रवणपूर्वगतिविधयः (Pre-listening activities)

(2) श्रवणसमयकगतिविधयः (While-listening activities)

(3) श्रवणपरगतिविधयः (Post-listening activities)

(4) श्रवणानन्तरगतिविधयः (Follow-up of listening activities)

**148. भाषाकक्षायां चित्राणां / विज्ञापनानां प्रयोगविषये अधोलिखितेषु का उक्तिः न समीचीना ?**

(1) एतेन चित्राणाम् अवलोकनार्थं बालेभ्यः अवसरः लभ्यते ।

(2) एतेन बालेभ्यः स्वकीयाम् अभिव्यक्तिं कर्तुं चित्राणाम् आधारेण लेखितुं च अवसरः लभ्यते ।

(3) एतेन बालैः काल्पनिकजगति तथा च कक्षायां तेषां सर्जनस्य कृत स्थानं प्राप्यते ।

(4) तेभ्यः श्रवणकौशलस्य विकासार्थम् अवसरः एतेन लभ्यते ।

**149. उद्गामिसाक्षरतास्तरे (emergent literacy stage) _____ अपि लेखनवर्गे स्वीक्रियते ।**

(1) अक्षराणां निर्माणम्

(2) शब्दानां लेखनम्

(3) वाक्यानां निर्माणम्

(4) चित्राङ्कनम्

**150. विद्यार्थिनः भाषायाः व्यवहारस्य आकलनार्थं निम्नलिखितेषु किं सर्वाधिकं महत्त्वपूर्णम् ?**

(1) चिह्नाङ्कनसूची (check list)

(2) मूल्यनिर्धारकश्रेणी (rating scale)

(3) पत्राधानम् (portfolio)

(4) वार्तालापः (interaction)

